।। श्रीः ।।

श्रीमदवधूतशिरोमणिश्रीजयतीर्थनिर्मितः

# भागवतसारोद्धारः



## श्रीमद्भागवतश्लोकानां संग्रहः

॥ श्रीः ॥

श्रीमदवधूतशिरोमणिश्रीजयतीर्थनिर्मितः

# भागवतसारोद्धारः

( मूलमात्रम् )

श्रीमद्भागवतश्लोकानां संग्रहः

| विषयानुक्रमणिका | पु. सं |
|---|---|
| भागवतागतिप्रकरणम् ॥१॥ | 1 |
| राजविरागप्रकरणम् ॥२॥ | 3 |
| शुकागमप्रकरणम् ॥ ३ ॥ | 4 |
| संक्षिप्तशास्त्रार्थप्रकरणम् ॥ ४ ॥ | 6 |
| वैराग्यप्रकरणम् ॥ ५ ॥ | 7 |
| महत्समागमप्रकरणम् ॥ ६ ॥ | 13 |
| महत्सेवाप्रशंसाप्रकरणम् ॥ ७ ॥ | 14 |
| महन्निन्दावर्जनप्रकरणम् ॥ ८ ॥ | 15 |
| आत्मप्रशंसावर्जनप्रकरणम् ॥ ९ ॥ | 16 |
| इन्द्रियजयप्रकरणम् ॥ १० ॥ | 17 |
| ब्रह्मोपदेशप्रकरणम् ॥ ११ ॥ | 18 |
| प्रवृत्तकर्मत्यागप्रकरणम् ॥ १२ ॥ | 21 |
| निवृत्तकर्मकरणप्रकरणम् ॥ १३ ॥ | 22 |
| देशप्रशंसाप्रकरणम् ॥ १४ ॥ | 23 |
| कालप्रशंसाप्रकरणम् ॥ १५ ॥ | 24 |
| देहप्रशंसाप्रकरणम् ॥ १६ ॥ | 24 |
| ध्यानप्रकरणम् ॥ १७ ॥ | 25 |
| बिम्बोपासकगुरुप्राप्तिप्रकरणम् ॥ १८ ॥ | 26 |
| अध्यात्मप्रकरणम् ॥ १९ ॥ | 28 |
| धर्मोपदेशप्रकरणम् ॥ २० ॥ | 30 |
| बिम्बोपदेशप्रकरणम् ॥ २१ ॥ | 39 |
| बिम्बोपासनापरपर्यायात्मसमर्पणप्रकरणम् ॥ २२ ॥ | 40 |
| भक्तिस्तुतिप्रकरणम् ॥ २३ ॥ | 41 |
| भक्तिकार्यप्रकरणम् ॥ २४ ॥ | 42 |
| अन्यथामत्यकरणप्रकरणम् ॥ २५ ॥ | 42 |
| गुरुविचारप्रकरणम् ॥ २६ ॥ | 43 |
| अपरोक्षप्रकरणम् ॥ २७ ॥ | 43 |
| गुणनिवृत्तिप्रकरणम् ॥ २८ ॥ | 43 |
| नामप्रशंसाप्रकरणम् ॥ २९ ॥ | 44 |
| गुरुदक्षिणाप्रकरणम् ॥ ३० ॥ | 45 |

# भागवतसारोद्धार:

**मङ्गलाचरणम्**

ॐ स्वस्तिश्रीरस्तु मे शस्तं निस्तुला निस्तुलात्पुन: ।
वस्तुनोऽवस्तुनो नित्यं समस्तव्यस्तयोगत: ॥

## भागवतागतिप्रकरणम् ॥१॥

नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ।
गृहीतशक्तित्रितयाय देहिनामन्तर्ध्रुवायानुपलभ्यवर्त्मने ॥१॥

भूयो नमः सद्वृजिनच्छिदेऽसतामसम्भवायाखिलसत्त्वमूर्तये ।
पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥२॥

पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ।
ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदन्ति ॥३॥

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह
यः पार्थिवान्यपि कविर्विममे रजांसि ।
चस्कम्भ यः स्वरभसा स्खलितं त्रिपृष्ठं
यन्मां निशम्यसदनादुरुकम्पमानम् ॥४॥

अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।
तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतम् ॥५॥

अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ।
उरुक्रमस्याखिलधर्मगुप्तये समाधिनानुस्मर यद्विचेष्टितम् ॥६॥

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽ-
प्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।

व्यतनुत कृपया यस्तत्त्वदीपं पुराणं
तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥७॥

अथाभिधेह्यङ्ग मनोऽनुकूलं प्रभाषसे भागवतप्रधानः ।
यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥८॥

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ।
यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता न हरेः कथायाम् ॥९॥

तदस्य कौषारव शर्म दातुर्हरेः कथामेव कथासु सारम् ।
उद्धृत्य पुष्पेभ्य इवार्तबन्धो शिवाय नः कीर्तय तीर्थकीर्तेः ॥१० ॥

कलिमलसंसृतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम्।
इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसङ्गैः ॥११॥

सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तुभ्यम् ।
प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवान् ऋषिभ्यः ॥१२ ॥

आसीनमुर्व्यां भगवन्तमाद्यं सङ्कर्षणं देवमकुण्ठसत्त्वम् ।
विवित्सवस्तत्त्वमतःपरस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥१३ ॥

प्रोक्तं किलैतद्भगवत्तमेन निवृत्तधर्माभिरताय तेन ।
सनत्कुमाराय यदाह पृष्टः साङ्ख्यायनायाङ्ग धृतव्रताय ॥१४ ॥

साङ्ख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ।
जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ॥१५॥

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ।
सोऽहं बतैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥१६ ॥

# राजविरागप्रकरणम् ॥२॥

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ।
जीवन्ति नात्मार्थमसौ परां श्रियं मुमोच निर्विद्य कुतः कलेवरम् ॥१७॥

यदा परीक्षित्कुरुजाङ्गले वसन्कलिं प्रविष्टं निजचक्रवर्तिते ।
निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगरोचिराददे ॥१८॥

न ते गुडाकेशयशोधराणां बद्धाञ्जलेर्भो भयमस्ति किञ्चित् ।
न वर्तितव्यं भवता कथञ्चित् क्षेत्रे मदीये त्वमधर्मबन्धुः ॥१९॥

त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मयूथः ।
लोभोऽनृतं चौर्यमनार्यमोहो ज्येष्ठा च माया कलहश्च दम्भः ॥२०॥

न वै नृभिर्नरदेवोऽपराध्यः तं शप्तुमर्हस्यविपक्वबुद्धे ।
यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥२१॥

अरक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ।
तदा हि चोरप्रचुरो विनङ्क्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ॥२२॥

अथो विहायेममुं च लोकं विमृश्य तौ हेयतया पुरस्तात् ।
कृष्णाङ्घ्रिसेवामभिमृशयमान उपाविशत्प्रायममर्त्यनद्याम् ॥२३॥

या वै लसच्छ्रीतुलसीविमिश्रकृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ।
पुनात्यशेषानुभयत्र लोकान् कस्तां न सेवेत मरिष्यमाणः ॥२४॥

तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ।
प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥२५॥

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरङ्गिराश्च ।
पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ॥२६॥

मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः ।
मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥२७॥

अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ।
नानार्षेयप्रवरान् समेतानभ्यर्च्य राजा शिरसा ववन्दे ॥२८॥

समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ।
नेहाथवामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलाः ॥२९॥

पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ।
महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥३०॥

## शुकागमप्रकरणम् ॥ ३ ॥

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ।
पुत्रेति तन्मयतया तरवोऽपि नेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥३१॥

यः स्वानुभावमखिलश्रुतिसारमेक–
मध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥३२ ॥

तत्राभवद्भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।
अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥३३॥

तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।
चार्वायताक्षोन्नसतुल्यकर्णं शुभ्राननं कम्बुसुजातकण्ठम् ॥३४॥

निगूढजत्रुं पृथुतुङ्गवक्षसमावर्तनाभिं वलिवल्गूदरं च ।
दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥३५॥

श्यामं सदापीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ।
प्रत्युत्थितास्ते मुनयश्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥३६॥

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाऽऽजहार ।
ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने चोपविवेश पूजितः ॥३७॥

प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ।
प्रणम्य मूर्ध्नावहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत् ॥३८॥

पितामहा मे समरेऽमरञ्जययैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः ।
दुरत्ययं कौरवसैन्यसागरं कृत्वातरन् वत्सपदं स्म यत्प्लवाः ॥३९॥

द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् ।
जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥४०॥

वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः ।
प्रयच्छतो मृत्युमनामयं च मायामनुष्यस्य वदस्व विद्वन् ॥४१॥

एवं निशम्य भृगुनन्दन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ।
प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥४२॥

# संक्षिप्तशास्त्रार्थप्रकरणम् ॥ ४ ॥

पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम् ।
पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम् ॥४३॥

ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्र
मात्मप्रसाद उभयत्र गुणेष्वसङ्गः ।
कैवल्यसम्भृतपथस्त्वथ भक्तियोगः
को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥४४॥

निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् ।
क उत्तमश्लोकगुणानुवादात्पुमान् विरज्येत विना पशुघ्नात् ॥४५॥

को नाम लोके पुरुषार्थसारवित्पुरा कथानां भगवत्कथासुधाम् ।
आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥४६ ॥

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥४७॥

शृण्वन् गृणन् संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्पते ॥४८॥

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥४९॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥५०॥

शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सम्यग् विमृशेषु हेतुः ।
असङ्ग आत्मव्यतिरिक्त वस्तुनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥५१॥

तच्छ्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया ।
योगेश्वरोपासनया च नित्यं पुण्यश्रवः कथया पुण्यया च ॥५२॥

अर्थेन्द्रियारामगुणेष्वतृष्णया तत्सम्मतानामपरिग्रहेण च ।
विविक्तरुच्या परितोष आत्मन् विना हरेर्गुणपीयूषपानात् ॥५३॥

अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना ।
यमैरकामैर्नियमैरनिन्दया निरीहया द्वन्द्वतितिक्षया च ॥५४॥

हरेर्मुहुस्तत्परकर्णपूरया गुणाभिधानेन विजृम्भमाणया ।
भक्त्या ह्यसङ्गः सदसत्परात्मनि स्यान्निर्गुणे ब्रह्मणि चाञ्जसा रतिः ॥५५॥

यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ।
दहत्यबीजं हृदयं जीवकोशं पञ्चात्मकं योनिमिवोत्थितोऽग्निः ॥५६॥

## वैराग्यप्रकरणम् ॥ ५ ॥

न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥५७॥

देह्यन्यदेहविवरे जठराग्निनासृग्-
विण्मूत्रकूपपतितो भृशतप्तदेहः ।
इच्छन्नितो विवसितुं गणयन् स्वमासान्
निर्वास्यते कृपणधीर्भवता कदा नु ॥५८ ॥

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्टेः प्रतिरूपमीहसे ।
परे तु जीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवं परः ॥५९॥

न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ।
यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥६०॥

अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥६१॥

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽभिगुप्तोऽस्य हतो न जीवति ॥६२॥

कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सुतत्स्नेहवशः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥६३॥

प्रत्ताः स्मरंस्ता दुहितृर्हृदय्या भ्रातृन् स्वसृर्वा पितरौ च दीनौ ।
गृहान् मनोज्ञान् रुचिरच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥६४॥

त्यजेत कोशस्थ इवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरन्तमोहः ॥६५॥

कुटुम्बपोषाय च यन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः ॥६६॥

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ।
प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी ॥६७॥

यतो न कश्चित्क्व च कुत्रविद्वान्दीनं स्वमात्मानमलं समर्थः ।
विमोचितुं कामदृशां विहारक्रीडामृगोऽयं निगडोऽक्षिसर्गः ॥६८॥

निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः ।
गृहेषु मैथुन्यपरेषु योषितां क्रीडामृगः पूरुष ईश गीयते ॥६९॥

विद्वानपीत्थं दनुजाः कुटुम्बं पुष्णन् स्वलोकाय न कल्पते वै ।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥७०॥

विमोहितोऽयं जन ईशमायया त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वञ्चितः ॥७१॥

ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ।
मर्त्यात्मबुद्धेः सुतदारकोशेष्वासज्जमानस्य दुरन्तचिन्तया ॥७२॥

कलेवरेऽस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ।
वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वामगणय्य दुर्मदः ॥७३॥

पुरा रथैर्हेमपरिष्कृतैश्चरन् मतङ्गजैर्वा नरदेवसंज्ञितः ।
स एव कालेन दुरत्ययेन कलेवरो विट्कृमिभस्मसंज्ञितः ॥७४॥

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबन्धापगमो यदृच्छया ।
यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखण्डभूमिपैः ॥७५॥

यद्वाचि तन्त्यां गुणकर्मनामभिः स्वदामभिर्वत्स वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥७६॥

भयं प्रमत्तस्य वनेष्वपि स्याद्यतोवसन्ते सह षट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥७७॥

यः षट्सपत्नान् विजिगीषमाणो गृहेषु निर्विद्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥७८॥

स्वपुत्रेभ्य इमां गां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव स महाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतरुचिरहरिविहारानुभवो भगवतो नारदस्य पदवीं अनुससार ॥७९॥

कुत्राशिषः श्रुतिसुखा मृगतृष्णरूपाः
क्वेदं कलेवरमशेषरुजां विरोहम् ।
निर्विद्यते न तु जनो यदपीति विद्वान्
कामानलं मधुलवैः शमयन् दुरापैः ॥८०॥

जिह्वैकतोऽच्युत विकर्षति मावितृप्ता
शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिः
बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥८१॥

किमात्मना तेन जहाति यो मुदं किं रिक्थहारैः स्वजनाख्यदस्युभिः ।
किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥८२॥

अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः ।
इदं कृतान्तान्तिकवर्ति जीवितं ययाध्रुवं स्तब्धमतिर्न बुध्यते ॥८३॥

गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु ।
अक्षय्यरत्नाभरणांबरादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥८४॥

आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोश
मन्तःपुरं परिविहारभुवश्च रम्याः ।
भूमण्डलं जलधिमेखलमाकलय्य
कालोपसृष्टमिति स प्रययौ विशालाम् ॥८५॥

वयं पुरा श्रीमदनष्टबुद्धयो जिहीर्षयास्या इतरेतरस्पृधः ।
घ्नन्तः प्रजाः स्वा अपि निर्घृणाः प्रभो मृत्युं परं त्वामगणय्य दुर्मदाः ॥८६॥

त एव कृष्णाद्य गभीररंहसा दुरन्तवीर्येण विचालिताः श्रिया ।
कालेन तद्वै भवतोऽनुकम्पया विनष्टदर्पाश्चरणौ स्मरामहे ॥८७॥

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात्प्रस्रावितं ब्रह्म चिरं धृतं यत् ॥८८॥

एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात्
पञ्चाशताथसुतपञ्चसहस्रसङ्गः ।
नान्तं व्रजाम्युभयकृत्यमनोरथानां
मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥८९॥

अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ।
आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥९०॥

सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ।
अथो अहं जनसङ्गाद्विमुक्तो विशङ्कमानोऽवधूतश्चरामि ॥९१॥

योषित्सुतल्पाभरणाम्बरादिद्रव्येषु मायारचितेषु मूढः ।
प्रलोभितात्मा ह्युपभोगबुद्ध्या पतङ्गवन्नश्यति नष्टदृष्टिः ॥९२॥

सन्तं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयातिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥९३॥

अहो मयाऽऽत्मा परितापितो वृथा साङ्केत्यवृत्त्यातिविगर्ह्यवार्तया ।
स्त्रैणान्नरांश्चार्थतृषोऽनुशोच्यान् क्रीत्वेह वित्तं रतिमात्मनेच्छती ॥९४॥

यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥९५॥

सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ।
मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ॥९६॥

रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत्प्रियं चलाः ॥९७॥

क्षुद्रं चरं सुमनसां शरणे मथित्वा
रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम् ।
अग्रे वृकानसुहृतोऽविगणय्य यान्तं
पृष्ठे मृगं मृगयुलुब्धकबाणभिन्नम् ॥९८॥

अस्यार्थः – सुमनसां सुमनःसधर्मणां स्त्रीणां शरणे आश्रमे पुष्पमधुगन्धवत्क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्व्यौपस्थ्यादि विचिन्वन्तं मिथुनीभूय तदभिनिवेशितमनसं षडङ्घ्रिगणसामगीतवदतिमनोहरवनितादि जनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान् तान् कालविशेषानविगणय्य गृहेषु विहरन्तं पृष्ठतः परोक्षमनुप्रवृत्तो लुब्धकः कृतान्तः शरेण यमिह पराविध्यति तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसीति यथा मृगयुहतं मृगमिति ॥९८॥

स त्वं विचक्ष्य मृगचेष्टितमात्मनोऽन्त-
श्चित्तं नियच्छ हृदि कर्णधुनीं च चित्तिम् ।
जह्यङ्गनाश्रममसत्तमयूथगाथं
प्रीणीहि हंसशरणं विरम क्रमेण ॥९९॥

कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम् ।
विज्ञानवैराग्यविवक्षया विभो वचो विभूतीर्न तु पारमार्थ्यम् ॥१००॥

या निर्वृतिस्तनुभृतां तव पादपद्म
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्।
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्-
किंत्वन्तकासिलुलितात्पततां विमानात् ॥१०१॥

# महत्समागमप्रकरणम् ॥ ६ ॥

धनं हि धर्मैकफलं यतोऽस्य ज्ञानं सविज्ञानमनुप्रशान्तिः ।
गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यम् ॥१०२॥

लोको विकर्मनिरतः कुशले प्रमत्तः
कर्मण्ययं त्वदुदिते भवदर्चने स्वे ।
यस्तावदस्य बलवानिह जीविताशां
सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥१०३ ॥

जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ।
अनुग्रहायेह चरन्ति नूनं भूतानि भव्यानि जनार्दनस्य ॥१०४ ॥

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।
सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायतेमतिः ॥१०५॥

सतां प्रसङ्गान्मम वीर्यसम्पदो भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥१०६ ॥

भक्त्या पुमान् जातविराग ऐन्द्रियाद्दृष्टश्रुतात्मद्रविणानुचिन्तया ।
चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥१०७ ॥

असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन ।
योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुन्धे ॥१०८ ॥

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥१०९॥

न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥११०॥

नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥१११॥

## महत्सेवाप्रशंसाप्रकरणम् ॥ ७ ॥

यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन्
सांसारिके पथि चरंस्तदतिश्रमेण ।
नष्टस्मृतिः पुनरयं प्रवृणीत लोको
युक्त्या कया महदनुग्रहमन्तरेण ॥११२ ॥

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥११३॥

ये वा मयीशे कृतसौहृदार्था जनेषु देहम्भरवार्तिकेषु ।
गृहेषु जायाऽऽत्मजरातिरासु न प्रीतियुक्ता यावदर्थाश्च लोके ॥११४॥

यत्सेवयाशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः ।
तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥११५॥

अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ।
न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यवर्यगुः ॥११६॥

यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमङ्गलमौनसंयमैः ।
समाधिना बिभ्रदिहार्थसिद्धये यत्रेदमादर्श इवावभासते ॥११७॥

यस्यामृतामलयशः श्रवणावगाहः
सद्यः पुनाति जगदाश्वपचं विकुण्ठः ।
सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्ति
श्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥११८ ॥

ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयन्तः
तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ।
वाण्यानुरागकलयाऽऽत्मजवद्गृणन्तः
संबोधयन्त्यहमिवाहमुपाहृतस्तैः ॥११९ ॥

तस्यावनिज्य चरणौ तदपः स्वमूर्ध्नि
बिभ्रज्जगद्गुरुतरोऽपि सतां पतिर्हि ।
ब्रह्मण्यदेव इति यद्गुणनामयुक्तं
तस्यैव यच्चरणशौचमशेषतीर्थम् ॥१२०॥

किरातहूणान्ध्रपुलिन्दपुल्कसा आभीरकङ्का यवनाश्शकादयः ।
येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥१२१॥

## महन्निन्दावर्जनप्रकरणम् ॥ ८ ॥

कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेङ्गते ।
अनाहुता अप्यभियान्ति सौहृदात् भर्तुर्गुरोर्देहकृतश्च केतनम् ॥१२२॥

त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियान्ति बन्धुषु ।
ते यद्यनुत्पादितदोषदृष्टयो बलीयसानात्म्यमदेन मन्युना ॥१२३॥

नैतादृशानां स्वजनव्यपेक्षया गृहान् प्रतीयादनवस्थितात्मनाम् ।
येऽभ्यागतान् वक्रधिया विचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥१२४॥

तथारिभिर्न प्रधने शिलीमुखैः शेतेऽर्दिताङ्गो हृदयेन दूयता ।
स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥१२५॥

कर्णौ पिधाय निरयाद्यदकल्प ईशे
धर्मावितर्यघृणिभिर्नृभिरस्यमाने ।
छिन्द्यात्प्रसह्य रुशतीमसतां प्रभुश्चेत्
जिह्वामसूनपि ततो विसृजेत्स धर्मः ॥१२६॥

नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिन्दा कुणपात्मवादिषु ।
सेर्ष्या महापूरुषपादपांसुभिः निरस्ततेजस्सु तदेव शोभनम् ॥१२७॥

सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देवगणेषु दैत्यैः ।
कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥१२८॥

विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमा मदैः ।
स्मृतौ हतायां अभिमानदुर्दृशस्तप्ता न पश्यन्ति हि धाम भूयसाम् ॥१२९॥

नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥१३०॥

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात्स्वकृताद्धि मादृग्धक्षत्यदूरादपि शूलपाणिः ॥१३१॥

नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ।
ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥१३२॥

## आत्मप्रशंसावर्जनप्रकरणम् ॥ ९ ॥

हे सूत हे मागध सौम्य बन्दिन् लोकेऽधुनास्पष्टगुणस्य मे स्यात् ।
किमाश्रयो वस्तव एष योज्यतां मा मय्यभूवन् वितथा गिरो वः ॥१३३॥

तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीड्यवाचः ।
सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयन्ति सभ्याः ॥१३४॥

महद्गुणानात्मनि कर्तुमिच्छन् कः स्तावकैः स्तावयतेऽसतोऽपि ।
स वै भविष्यन्निति विप्रलब्धो जनापहासं कुमतिर्न वेद ॥१३५॥

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ।
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥१३६॥

इत्थं शरत्प्रावृषिकावृतू हरेर्-
विशृण्वतो मेऽनुसवं यशोऽमलम्।
सङ्कीर्त्यमानं मुनिभिर्महात्मभिर्-
भक्तिः प्रवृत्ताऽऽत्मरजस्तमोऽपहा ॥१३७॥

## इन्द्रियजयप्रकरणम् ॥ १० ॥

सङ्गं त्यजेत मिथुनवृजिनां मुमुक्षुः
सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ।
एकश्चरन् रहसि चित्तमनन्त ईशे
युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥१३८॥

यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ।
यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान् लब्धबलो न चाल्यते ॥१३९॥

मौनव्रतश्रुततपोऽध्ययनस्वधर्म
व्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ते त्वजितेन्द्रियाणां
वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥१४०॥

यन्मैथुनादिगृहमेधिसुखं हि तुच्छं
　　कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति देहकृपणा बहुदुःखभाजः
　　कण्डूतिवन्मनसिजं विषहेत धीरः ॥१४१॥

नैतन्मनस्तव कथासु विकुण्ठनाथ
　　सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हर्षशोकभयैषणार्तं तस्मिन्
　　कथं तव गतिं विमृशामि दीनः ॥१४२॥

दानं स्वधर्मो नियमो यमश्च श्रुतानि कर्माणि च सद्व्रतानि ।
सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ॥१४३॥

समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यम् ।
असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥१४४॥

तथापि सङ्गः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ।
मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत तमः कषायम् ॥१४५॥

यथाऽमयोऽसाधुचिकित्सितो नृणां पुनः पुनः सन्तुदति प्ररोहन् ।
एवं मनोपक्वकषायकर्म कुयोगिनं विध्यति सर्वसङ्गम् ॥१४६॥

## ब्रह्मोपदेशप्रकरणम् ॥ ११ ॥

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
　　तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
　　धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥१४७॥

यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ।
तं सर्ववादविषयप्रतिरूपशीलं वन्दामहे पुरुषमात्मनिगूढबोधम् ॥१४८॥

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके
एके परं सदसतोः पुरुषं परेशम् ।
अन्ये वदन्ति नवशक्तियुतं परं त्वां
केचिन्महापुरुषमव्ययमात्मतन्त्रम् ॥१४९॥

हिरण्यगर्भत्वमुपेत्य मूले सृजत्यशेषं भुवनं स एव ।
नारायणात्मन् परिपासि भूयो जहार चान्ते भगवन् शिवात्मना ॥१५०॥

यश्चिन्त्यते प्रयतपाणिभिरध्वराग्नौ
त्रय्या निरुक्तविधिना स्वहविर्गृहीत्वा ।
अध्यात्मयोग उत योगिभिरात्ममाया-
जिज्ञासुभिः परमभागवतैः परीष्टः ॥१५१॥

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥१५२॥

अहं हि पृष्टोऽस्य गुणान्भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ।
नभः पतन्त्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥१५३॥

नान्तं विदाम्यहममी मुनयः प्रजेशा
मायाबलस्य पुरुषस्य कुतः परे ये ।
गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनापि समवस्यति नास्य पारम् ॥१५४॥

नाहं न यूयं बत तद्गतिं विदुर्न वामदेवः किमुतापरे सुराः ।
यन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं स्वात्मसमं विचक्ष्महे ॥१५५॥

येषां स एव भगवान् दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ।
ते वै विदन्त्यतितरन्ति च देवमायां
नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥१५६॥

वेदाहमङ्ग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ।
पत्नी मनोः स च मनुस्तदपत्यभूताः प्राचीनबर्हि ऋभुरङ्ग उत ध्रुवश्च॥१५७॥

इक्ष्वाकुरैलमुचुकुन्दविदेहगाधिरघ्वम्बरीषसगरा गयनाहुषाद्याः ।
मान्धात्रलर्कशतधन्वनरन्तिदेवा देवव्रतो बलिरमूर्त्तरयो दिलीपः ॥१५८॥

सौभर्युदङ्कशिबिदेवलपिप्पलादाः सारस्वतोद्धवपराशरभूरिषेणाः।
येऽन्ये विभीषणहनूमदुपेन्द्रदत्ताः पार्थार्ष्टिषेणविदुरश्रुतदेवमुख्याः ॥१५९॥

ते वै विदन्त्यतितरन्ति च देवमायां
स्त्रीशूद्रहूणशबरा अपि पापजीवाः ।
यद्यद्भुतक्रमपरायणशीलशिक्षा
स्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥१६०॥

एतावतालं ननु सूचितेन गुणैरसाम्येऽनतिशायनेऽस्य ।
हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं जुषतेऽनभीप्सोः ॥१६१॥

नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न सङ्गवर्जितम् ।
कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥१६२॥

धर्मः क्वचित्तस्य न भूतसौहृदं त्यागः क्वचित्तच्च न मुक्तिकारणम् ।
वीर्यं च पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥१६३॥

क्वचिच्चिरायुर्न च शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः ।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्चन काङ्क्षते हि माम् ॥१६४॥

एवं विमृश्याऽव्यभिचारिसद्गुणं पदं निजैकाश्रयि सद्गुणाश्रयम् ।
वव्रे परं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥१६५॥

स्वस्याः श्रियस्त्रिजगतो जनको जनन्या
वक्षो निवासमकरोत्परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन
यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥१६६॥

श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यत्स्वपूर्णः।
न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत्पुमान् कृतज्ञः ॥१६७॥

रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुमध्यात्मदीपम् ॥१६८॥

त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदन्त्यनीहादगुणादविक्रियात् ।
त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यसे जनैः ॥१६९॥

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।
अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले ॥१७०॥

अयं तु तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम् ।
तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥१७१॥

## प्रवृत्तकर्मत्यागप्रकरणम् ॥ १२ ॥

क्षुत्तृट् त्रिधातुभिरिमा मुहुरर्द्यमानाः
शीतोष्णवातवर्षैरितरेतराच्च ।
कामाग्निनाच्युत रुषा च सुदुर्भरेण
सम्पश्यतो मन उरुक्रम सीदते मे ॥१७२॥

नैवोद्विजे भव दुरत्ययवैतरिण्या
स्त्वत्तीर्थगायनमहामृतमत्तचित्तः ।
शोचे नु ते विमुखचेतस इन्द्रियार्थ
मायासुखाय भरमुद्वहतो विमूढान् ॥१७३॥

जुगुप्सितं धर्मकृतेऽनुशासनं स्वभावरक्तस्य महान् व्यतिक्रमः ।
यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥१७४॥

कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ।
दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥१७५॥

गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ।
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥१७६॥

मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासनधूमवर्त्मनाम् ।
कदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिङ्गा अवधूतसेविताः ॥१७७॥

## निवृत्तकर्मकरणप्रकरणम् ॥ १३ ॥

त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वाभद्रमभूदमुष्य को वार्थ आप्तो भजतां स्वधर्मम् ॥१७८॥

हरौ गुरौ मयि भक्त्यानुवृत्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहा निवृत्त्या ॥१७९॥

मत्कर्मभिर्मत्कथया च नित्यं मत्पादसङ्गाद्गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥१८०॥

अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सम्यक् ।
तच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन जयेन वाचाम् ॥१८१॥

सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युभवसत्त्वयुक्तो लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम् ॥१८२॥

पुत्रांश्च शिष्यांश्च पिता गुरुर्वा मल्लोककामो मदनुग्रहार्थः ।
इत्थं विमन्युरनुशिष्यादतज्ज्ञान् न योजयेत्कर्मसु कर्ममूढान् ॥१८३॥

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥१८४॥

# देशप्रशंसाप्रकरणम् ॥ १४ ॥

अहो बतैषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकस्पृहात्मभिः ॥१८५॥

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात् ॥१८६॥

कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरः ।
क्षणेन मर्त्येन कृतं मनस्विनः सन्न्यस्य संयान्त्यभयं पदं हरेः ॥१८७॥

न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न याति सेव्यताम् ॥१८८॥

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाब्जनाभस्मृति जन्म नः स्याद्वर्षे हरिर्भजतां शं तनोति ॥१८९॥

मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वितचर्वणानाम् ॥१९०॥

तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।
हित्वात्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत ॥१९१॥

शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः।
मय्यर्पितात्मा गृह एव तिष्ठन् नातिप्रसक्तः समुपैति शान्तिम् ॥१९२॥

यद्वाञ्छया नृपशिरोमणयोऽङ्ग वैन्य
जायन्तनाहुषगदादय ऐकपत्यम् ।
राज्यं विसृज्य विविशुर्वनमम्बुजाक्ष
सीदन्ति नाऽनुपदवीं त इहास्थिताः किम् ॥१९३॥

## कालप्रशंसाप्रकरणम् ॥ १५ ॥

कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ।
प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाखण्डविभिन्नचेतसः ॥१९४॥

यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन् वा विवशो गृणन् पुमान् ।
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥१९५॥

योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥१९६॥

## देहप्रशंसाप्रकरणम् ॥ १६ ॥

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावबोधधिषणं मुदमाप देवः ॥१९७॥

प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसम्भृताः ।
न चेत् यतेरन्नपुनर्भवाय भूयो वनौका इव यान्ति बन्धनम् ॥१९८॥

लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु यावन्-
निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥१९९॥

## ध्यानप्रकरणम् ॥ १७ ॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्र
पातालदिङ्नरकभागणलोकसंस्थम् ।
गीतं मया तव नृपाद्भुतमीश्वरस्य
स्थूलं वपुः सकलजीवनिकायधाम्नः ॥२००॥

तस्या विशुद्धकरणः शिववार्विगाह्य
बद्ध्वाऽऽसनं जितमरुन्मनसाऽऽहृताक्षः ।
स्थूले दधार भगवत्प्रतिरूप एत
द्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥२०१॥

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ।
अस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥२०२॥

केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्ति ॥२०३॥

प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम् ।
लसन्महारहारहिरण्मयाङ्गदस्फुरन्महारत्नकिरीटकुण्डलम् ॥२०४॥

उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्षणं कौस्तुभरत्नकन्धरमम्लानलक्ष्म्या वनमालयाञ्चितम् ॥२०५॥

विभूषितं मेखलयाङ्गुलीयकैर्महाधनैर्नूपुरकङ्कणादिभिः ।
स्निग्धामलैः कुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥२०६॥

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥२०७॥

एकैकशोऽङ्गानि धिया विभावयेत्पादादि यावद्धसितं गदाभृतः ।
जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥२०८॥

## बिम्बोपासकगुरुप्राप्तिप्रकरणम् ॥ १८ ॥

शुद्धिर्नृणां न तु तथेड्य दुराशयानां
विद्याश्रुताध्ययनदानतपःक्रियाभिः ।
सत्त्वात्मनामृषभ ते यशसि प्रवृद्ध
सच्छ्रद्धया श्रवणसम्भृतया यथा स्यात् ॥२०९॥

सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम्।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥२१०॥

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च।
सत्त्वस्य शुद्धिं परमां च भक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥२११॥

यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति तत्वसूक्ष्मं चक्षुर्यथैवाञ्जनसम्प्रयुक्तम् ॥२१२॥

त्रिभुवनविभवहेतुभिर्विकुण्ठस्मृतिभिरजेशसुरादिभिर्विमृग्यात् ।
न चलति भगवत्पदारविन्दाल्लवनिमिषार्धमपि स्म वैष्णवाग्र्यः ॥२१३॥

विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरशनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥२१४॥

कृष्णाङ्घ्रिपद्ममधुलिण्ण पुनर्विसृष्ट-
मायागुणेषु रमते वृजिनावहेषु ।
अन्यस्तु कामहत आत्मरजः प्रमार्ष्टु
मीहेत कर्म यत एव रजः पुनः स्यात् ॥२१५॥

न वै जनो जातु कथञ्चनाव्रजेन्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।
स्मरन् मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रही जनः ॥२१६॥

मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथोपयातं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृङ्क्ते ॥२१७॥

एवं जनं निपतितं प्रभवाहिकूपे
कामाभिकाममनु यः प्रपतन् प्रसङ्गात् ।
कृत्वाऽऽत्मसात्सुरर्षिणा भगवन् गृहीतः
सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २१८॥

सोऽहं प्रियस्य सुहृदः परदेवताया
लीलाकथास्तव नृसिंह विरिञ्चगीताः ।
अञ्जस्तराम्यनुगृणन् गुणविप्रमुक्तो
दुर्गाणि ते पदयुगालयहंससङ्गः ॥२१९॥

कस्तं त्वनादृत्य परानुचिन्तामृते पशुत्वमसतीं नाम युञ्ज्यात्।
पश्यन् जनं निपतितं भववैतरिण्यां स्वकर्मजान् परितापाञ्जुषाणम् ॥२२०॥

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ।
यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥२२१॥

# अध्यात्मप्रकरणम् ॥ १९ ॥

भवाय नस्त्वं भव विश्वभावन त्वमेव मातात्मसुहृत्पतिः पिता ।
त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥२२२॥

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ।
संसेवया सुरतरोरिव ते प्रसादः सेवानुरूप उदयो न विपर्ययोऽत्र ॥२२३॥

एवं सुरासुरगणाः समदेशकाल
हेत्वर्थयोगगतयोऽपि फले विकल्पाः ।
तत्रामृतं सुरगणाः फलमञ्जसाऽऽपु
र्यत्पादपङ्कजरजःश्रयणान्न दैत्याः ॥२२४॥

नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथापि ।
संसेवया सुरतरोरिव ते प्रसादः सेवानुरूप उदयो न परावरत्वम् ॥२२५॥

नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तये यथा ।
तथैव मत्तः फलसम्पदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम् ॥२२६॥

त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं त्वयैवाद्य तदेव शोभनम् ।
मन्ये महानस्य कृतोप्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥२२७॥

यत्पादयोरवशधीः सलिलं प्रदाय
दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अत्युत्तमां गतिमसौ भजते त्रिलोकीम्
दत्वा न विक्लवमनाः कथमार्तिमृच्छेत् ॥२२८॥

बिभेमि नाहं निरयात्पदच्च्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात् ।
न चार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥२२९॥

भ्रातुर्विरूपकरणं युधि निर्जितस्य
प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम् ।
दुःखं तदुत्थमसहोऽस्मदयोगभीत्या
नैवाब्रवीः किमपि तेन वयं जितास्ते ॥२३०॥

अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥२३१ ॥

कः पण्डितस्त्वदपरं शरणं समीयात्
भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ।
सर्वान् ददाति सुहृदो भजतोऽभिकामान्-
आत्मानमप्युपचयापचयौ न यस्य ॥२३२॥

यत्सानुबन्धेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ।
पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन् पदाब्जम् ॥२३३ ॥

भूतैर्महद्भिर्य इमाः पुरो विभु-
र्निर्माय शेते यदमूषु पूरुषः ।
भुङ्क्ते गुणान् षोडश षोडशात्मकः
सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥२३४॥

सृष्टं स्वशक्त्येदमनुप्रविश्य चतुर्विधं पुरमात्मांशकेन ।
अथो विदुस्त्वां पुरुषं सन्तमत्र भुङ्क्ते हृषीकैर्मधु सारघं यतः ॥२३५॥

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।
भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥२३६॥

# धर्मोपदेशप्रकरणम् ॥ २० ॥

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ।
वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसा त्वापुरकुण्ठधिष्ण्यम् ॥२३७ ॥

तथापरे त्वात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ।
त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ॥२३८ ॥

धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ।
न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणादयः ॥२३९॥

जितमजित तदा भवता यदा भवान् भागवतं धर्ममनवद्यम् ।
निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥२४०॥

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च योऽन्यत्र ।
विषमधिया रचितः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥२४१॥

न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ।
स्थिरचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ॥२४२॥

यत्पादपङ्कजरजः शिरसा बिभर्ति
श्रीरब्जजश्चगिरिशः सह लोकपालैः ।
लीलातनूः स्वकृतसेतुपरीप्सया यः
काले दधत्स भगवान् स्वकृतेन तुष्येत् ॥२४३॥

अथापि यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः ।
सेशं पुनात्यन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः ॥२४४॥

तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ।
अमायिनः कामदुघाङ्घ्रिपङ्कजं यथाधिकारावसितार्थसिद्धये ॥२४५॥

स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः ।
योऽमायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धम् ॥२४६॥

इत्थं परस्य निजधर्मरिरक्षयाऽऽत्त
लीलातनोस्तदनुरूपविडम्बनानि ।
कर्माणि कर्मकषणानि यदूत्तमस्य
गायेदमुष्य पदयोरनुवृत्तिमिच्छन् ॥२४७॥

मर्त्यस्तयानुसवमेधितयानुवृत्या
श्रीमत्कथाश्रवणकीर्तनचिन्तयैति ।
तद्धाम दुष्करकृतं जनतापवर्गं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थे ॥२४८॥

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः ।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥२४९॥

सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ।
सम्भावितव्यानि पदे पदे वो विविक्तदृष्टिस्तदुतार्हणं मे ॥२५०॥

मनोवचोदृक्करणैर्हि तस्य साक्षात्कृतं मे परिबर्हणं तत् ।
विना पुमान् येन महाविमोहकृतान्तपाशान्न विमोक्तुमीशः॥२५१॥

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ।
सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यम् ॥२५२॥

शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः ॥२५३॥

जह्यासुरं भावमिमं स्वमात्मनः समं मनो धत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथस्थितात् तद्धि ध्यनन्तस्य महत्समर्हणम् ॥२५४॥

तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न विजित्य केचित् ।
कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्रैरुदासीनरिपुं विमूढाः ॥२५५॥

दस्यून् पुरं षण् न विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥२५६॥

मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ।
मृधे शयीरन् न तु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥२५७॥

तत्वे मनो दर्शने दृगपि स्तुतौ च
वाक्कर्मणि ह्यपि करौ श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं
भक्तिं जनः परमहंसगतौ लभेत ॥२५८॥

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नौ ।
स्मृत्यां शिरस्तव सुरप्रवर प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥२५९॥

सा वागनन्तस्य गुणान् गृणीते करौ च तत्कर्मकरौ मनश्च ।
स्मरेद्वसन्तं स्थिरजङ्गमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥२६०॥

शिरस्तु तस्योभयलिङ्गमानमेत्तदेव यत्पश्यति तद्धि चक्षुः ।
अङ्गानि विष्णोरथ तज्जनानां पादोदकं यानि भजन्ति नित्यम् ॥२६१॥

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥२६२॥

मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गम् ।
घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसनां तदर्पिते ॥२६३॥

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं तु दास्ये न तु कामकाम्यया यदुत्तमश्लोकजनाश्रया रतिम् ॥२६४॥

एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२६५॥

बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य ।
जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाम् ॥२६६॥

भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा ॥२६७॥

बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥२६८॥

जीवञ्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलषेत यस्तु ।
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गन्धम् ॥२६९॥

निष्किञ्चना मय्यनुरक्तचेतसः शान्ता महान्तोऽखिलजीववत्सलाः ।
कामैरनालब्धधियो जुषो ये ते नैरपेक्ष्यं न विदुः सुखं मम ॥२७०॥

अकिञ्चनानां हि धनं शिलोञ्छनं स तेन निर्वर्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं तु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥२७१॥

मागारदारात्मजदेहबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥२७२॥

स चिन्तयन् द्व्यक्षरमेकदाम्भसि उपाशृणोद्द्विर्गदितं वचो विभुः ।
स्पर्शेषु यत्षोडशमेकविंशं निष्किञ्चनानां नृप यद्धनं विदुः ॥२७३॥

विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ।
तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् ॥२७४॥

वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनाम् ।
ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृणीत कः ॥२७५॥

मां प्राप्य मानिन्यपवर्गसम्पदं वाञ्छन्ति ये सम्पद एव सत्पतिम् ।
ते मन्दभाग्या निरयेऽपि ये स्युः मात्रात्मकत्वान्निरये सुसङ्गमः ॥२७६॥

नूनं विमुष्टमतयस्तव मायया ते
ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ।
अर्चन्ति कल्पकतरुं कुणपोपभोग्य
मिच्छन्ति यत्स्पर्शजं निरयेऽपि नृणाम् ॥२७७॥

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजः प्रपन्नाः ॥२७८॥

नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किन्त्वान्यदर्पितभयं भ्रुव उन्नयैस्ते ।
येऽङ्ग त्वदङ्घ्रिशरणा भवतः कथायाः
कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥२७९॥

कामं भवेम वृजिनैर्निरयेषु नष्टा
श्चेतोऽलिवद्यदि नु ते पदयो रमेत ।
वाचश्च नस्तुलसिवेद्यदि तेऽङ्घ्रिशोभाः
पूर्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥२८० ॥

न कामयेऽन्यं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद्वरं विभो।
आराध्य कस्त्वां अपवर्गदं हरे वृणीत आर्यो वरमात्मबन्धनम् ॥२८१॥

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थितो यत्पुनरर्थिनो मदः ।
स्वयं विधत्ते भजतामनिच्छतामिच्छाविधानं निजपादपल्लवम् ॥२८२॥

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो
योगेश्वरैरपि दुरत्यययोगमार्गः ।
क्षेमं विधास्यति स नो भगवांस्त्र्यधीशः
त्रातास्मदीयविमृशेन कियानिहार्थः ॥२८३ ॥

न यस्य सख्यं पुरुषो वेत्ति सख्युः सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनोऽव्यक्तदृष्टिस्तस्मै महेशाय नमस्करोमि ॥२८४॥

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ।
विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥२८५॥

विषान्महाग्नेः पुरुषाददंशानादसत्सभाया वनवासकृच्छ्रतः ।
मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥२८६॥

तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनि जन्मनि स्यात् ।
महानुभावेन गुणालयेन विषज्ञतस्तत्पुरुषप्रसङ्गः ॥२८७॥

भक्ताय चित्रा भगवान् हि सम्पदो राज्यं विभूतीर्न समर्थयत्यजः ।
अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवम् ॥२८८॥

स्यान्नस्तवाङ्घ्रिरशुभाशयधूमकेतुः
क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ।
यः सात्विकैः समविभूतिभिरात्मविद्भिर्
व्यूह्याऽर्चितः सवनशः स्वरतिक्रमैर्यः ॥२८९॥

प्रक्रमवत्स्वसत्कृतं पुरुषेषु धीषु तु बहिरन्तरसञ्चरणे ।
तव पुरुष वदन्त्यखिलशक्तिधृतः स्वकृतम्॥ २९०॥

योऽन्तःप्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिलशक्तिधरः स्वधाम्ना ।
अन्यांश्च हस्तचरणश्रवणत्वगादीन्
प्राणान् नमो भगवते पुरुषाय तुभ्यम् ॥२९१॥

देहेन्द्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरन्ति कर्मसु ।
नैवान्यदा लोहमिव प्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेमि ॥२९२॥

नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ।
निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥२९३॥

यत्कीर्तनं यच्छ्रवणं यदीक्षणं यद्वन्दनं यत्स्मरणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥२९४॥

नैवात्मनः प्रभुरयं निजलाभपूर्णो
मानं जनादविदुषः करुणो वृणीते ।
यद्यज्जनो भगवते विदधीत मानं
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥२९५॥

अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृतिगुण व्यतिरेकमतिरनीश ईश्वरस्य प्रकृतिपुरुषयोः परस्य अर्वाक्तनमतिर्नामरूपाकृतिभिर्निरूपणम् ॥४॥ परिजनानुरागविरचितस्तवलव-संशब्दसलिलकिसलयतुलसीदूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम परितुष्यसि ॥६॥ अथानयापि न भवत इज्ययोरुसम्भारभरया समुचितमर्थमि-होपलभामहे ॥७॥ आत्मन एवानुसवनमञ्जसाव्यतिरेकेण अनुबोभूयमानाशेष-पुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥८॥ अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः श्रीमच्चरणारविन्दस्मरणाय ज्वरमरणदशायामपि सकलकश्मल-निरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥१२॥ - ॥२९६॥

इति प्रार्थना ।

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥२९७॥

सवाग्विसर्गो जनताघविप्लवो
यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोऽङ्कितानि यत्-
शृण्वन्ति गायन्ति गृणन्ति साधवः ॥२९८ ॥

यत्रोत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥२९९॥

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥३००॥

मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ।
तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥३०१॥

तदेव पुण्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम् ।
तदेव शोकार्णवशोषणं नृणां यत्रोत्तमश्लोकयशोऽनुगीयते ॥३०२॥

यस्यां न मे पावनमङ्ग कर्म स्थित्युद्भवत्राणनिरोधमस्य ।
लीलावतारेहितकर्म वा स्याद्वन्ध्यां गिरं तां बिभृयान्न धीरः ॥३०३॥

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ।
वित्तं त्वतीर्थीकृतमङ्ग वाचं हीनां मया रक्षति दुःखदुःखी ॥३०४॥

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं यदि कर्हिचित् वदेत् ।
तद्ध्वाङ्क्ततीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥३०५॥

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं न गृणीत कर्हिचित् ।
तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा न्यपतन्मिमंक्षया ॥३०६॥

जरायुजं स्वेदजमण्डजोद्भवं चराचरं देवर्षिपितृभूतभेदम् ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥३०७॥

शब्दस्य हि ब्रह्मण एष पन्था यन्नामभिर्ध्यायति धीरपार्थैः ।
परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः ॥३०८॥

यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥३०९॥

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्चसर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्मि तद्वत् ॥३१०॥

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तोऽव्यवसायबुद्धिः ।
सिद्धेऽन्यथार्थे न यतेत तत्तत्परिश्रमं तत्र समीक्षमाणः ॥३११॥

सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।
सत्यञ्जलौ किं पुरुपर्णपात्रैः दिग्वस्त्रलाभे सति किं दुकूलैः ॥३१२॥

चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नो वाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।
रुद्धा गुहाः किमवधूतसुहृन्न कृष्णः
कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ॥३१३॥

## बिम्बोपदेशप्रकरणम् ॥ २१ ॥

मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥३१४॥

विद्यातपःप्राणनिरोधमैत्री तीर्थाभिषेकव्रतदानजाप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥३१५॥

तावद्भयं द्रविणदेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ।
तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेऽङ्घ्रिमभयं प्रवृणीत लोकः॥३१६॥

भक्तिः परेस्वेऽनुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुधपायोऽनुघासम् ॥३१७॥

इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ।
भवन्ति वै भागवतस्य राजंस्ततः परां शान्तिमुपैति साक्षात् ॥३१८॥

विचक्षणा यच्चरणोपसादनात्सङ्गं व्युदस्योभयतोऽन्तरात्मनः ।
विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥३१९॥

स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सन् बहिश्च ।
देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवैहि परं नरेन्द्र ॥३२०॥

ज्ञानं विशुद्धं परमार्थमेकमनन्तरं न बहिर्ब्रह्म सत्यम् ।
प्रत्यक्प्रशान्तं भगवच्छब्दवाच्यं यद्वासुदेवं कवयो वदन्ति ॥३२१॥

रहूगणैतत्तपसा न याति न विद्यया निर्वसनाद्गृहाद्वा ।
न छन्दसा नोऽत जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥३२२॥

त्वं प्रत्यगात्मनि सदा भगवत्यनन्ते
आनन्दमात्र उपपन्नसमस्तशक्तौ ।
भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं
विभेत्स्यसि ममाहमिति प्ररूढाम् ॥३२३॥

## बिम्बोपासनापरपर्यायात्मसमर्पणप्रकरणम् ॥ २२ ॥

यस्मात्प्रियाप्रियवियोगसुयोगजन्म
शोकाग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाहं
भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥३२४॥

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग
ईक्षा त्रयी नयदमौ विविधा च वार्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं
स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥३२५॥

विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचनात्मगेहप्राणः पुनाति सकलं न तु भूरिमानः ॥३२६॥

किञ्चित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ।
मयोपनीतं पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा ॥३२७॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावम् ।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥३२८॥

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥३२९॥

तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः ।
क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥३३०॥

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥३३१॥

## भक्तिस्तुतिप्रकरणम् ॥ २३ ॥

वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥३३२॥

तस्मिन् भवन्तावखिलात्मयोनौ नारायणे कारणमर्त्यमूर्तौ ।
भावं व्यधत्तां नितरां महात्मन् किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥३३३॥

मन्ये धनाभिजनरूपतपःश्रुतौजः
तेजःप्रभावबलपौरुषबुद्धियोगाः ।
नाराधनाय हि भवन्ति परस्य पुंसो
भक्त्या तुतोष भगवान् ननु यूथपाय ॥ ३३४ ॥

न जन्म नूनं महतो न सौभगं न चाङ्ग बुद्धिर्नाकृतिस्तोषहेतुः।
तिर्यग्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥३३५॥

सुरोऽसुरो वाथ नरोऽथ वानरः सर्वात्मना यः सुकृतज्ञमुत्तमम्।
भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोसलान् दिवम् ॥३३६॥

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ।
ये संयुगेऽचक्षत ताक्ष्र्यपुत्रस्यांसे सुनाभायुधमापतन्तम् ॥३३७ ॥

## भक्तिकार्यप्रकरणम् ॥ २४ ॥

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥३३८॥

क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः ॥३३९॥

निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदः प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥३४०॥

यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्मगतिर्गतत्रपः ॥३४१॥

तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥३४२॥

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥३४३॥

## अन्यथामत्यकरणप्रकरणम् ॥ २५ ॥

न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ।
यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ॥३४४॥

प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ।
प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥३४५॥

श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ।
जातस्मयेनान्धधियः सहेश्वरान् सतोऽवमन्यन्त हरिप्रियान् खलाः ॥३४६॥

## गुरुविचारप्रकरणम् ॥ २६ ॥

नैवोपयान्त्यपचितिं कवयस्तवेश
ब्रह्मादयोऽपि कृतमृद्धमुदः स्मरन्तः ।
योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्-
आचार्यचैत्त्यवपुषा स्वगतिं व्यनंक्षि ॥३४७॥

## अपरोक्षप्रकरणम् ॥ २७ ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु योनिष्विव जातवेदसम् ।
मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥३४८॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ।
तथैव तत्रातिशयात्मबद्धिभिर्निरस्तमायाकृतये नमो नमः ॥३४९॥

## गुणनिवृत्तिप्रकरणम् ॥ २८ ॥

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथो यथा ।
तत्कर्मसङ्कल्पविकल्पकं मनो बुधो निदध्यादभयं ततः स्यात् ॥३५०॥

# नामप्रशंसाप्रकरणम् ॥ २९ ॥

तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मनः ।
दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्सेत रुजां निदानवित्॥३५१॥

न चेदिहैवापचितिं यथांहसः कृतस्य कुर्यान्मन उक्तपाणिभिः।
ध्रुवं स वै प्रेत्य निरयानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥३५२॥

एतावतालमघनिर्हरणाय पुंसां
सङ्कीर्तनं भगवतो गुणकर्मनाम्नाम् ।
विक्रुश्य पुत्रमघवान् यदजामिलोऽपि
नारायणेति म्रियमाण इयाय मुक्तिम् ॥३५३॥

प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्बत माययालम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्मणि युज्यमानः ॥३५४॥

एवं विमृश्य सुधियो भगवत्यनन्ते
सर्वात्मना विदधते खलु भावयोगम् ।
ते मे न दण्डमर्हन्त्यथ यद्यमीषां
स्यात्पातकं तदपि हन्त्युरुगायवादः ॥३५५॥

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिङ्गानि महाद्भुतानि ।
रक्षन्ति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥३५६॥

तानानयध्वमसतो विमुखान् मुकुन्द
पादारविन्दमकरन्दरसादजस्रम् ।
निष्किञ्चनैः परमहंसकुलै रसज्ञैः
जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥३५७॥

जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविन्दम् ।
कृष्णाय नो नमति यच्छिर एकदापि
तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥३५८॥

तत्क्षम्यतां स भगवान् पुरुषः पुराणो
नारायणः स्वपुरुषैर्यदसत्कृतं नः ।
स्वानामहो न विदुषां रचिताञ्जलीनां
क्षान्तिर्वरीयसि नमः पुरुषाय भूम्ने ॥३५९॥

इत्थं स्वभर्तृगदितं भगवन्महित्वं
संश्राव्य विस्मितधियो यमकिङ्कारास्ते ।
तेनाच्युताश्रयजनं प्रतिशङ्कमाना
द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ॥३६०॥

अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सुराद्यान् ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥३६१ ॥

## गुरुदक्षिणाप्रकरणम् ॥ ३० ॥

ज्ञानं तदेतदखिलं दुरवापमाह
नारायणो नरसखः किल नारदाय ।
एकान्तिनां भगवतस्तदकिञ्चनानां
पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ॥३६२॥

यैरीदृशी भगवतो गतिरात्मवाद
एकान्ततो निगमिभिः प्रतिपादिता नः ।
तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं
को नाम तत्प्रतिकरोति विनोदपात्रम् ॥३६३॥

मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित्।
येषां किमु स्यादितरेण तेषामकिञ्चनानां अपि भक्तिभाजाम् ॥३६४॥

य इदमनुशृणोति श्रावयेद्वा मुरारे–
श्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।
जगदघभिदलं तद्भक्तकर्णावतंसम्
भगवति कृतचित्तो याति तत्क्षेमधाम ॥३६५॥

तमहमजमनन्तमात्मतन्त्रं जगदुदयस्थितिसंयमात्मशक्तिम्।
द्युपतिभिरजशक्रशङ्कराद्यैः दुरवसितस्तवमच्युतं नतोऽस्मि ॥३६६॥

उपचितनवशक्तिभिः स्व आत्मनि उपरचितस्थिरजङ्गमपालनाय।
भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥३६७॥

**॥ इति श्रीमदवधूतशिरोमणिश्रीजयतीर्थार्यनिर्मित श्रीमद्भागवतसारोद्धारः समाप्तः ॥**

***